# Sample Paper-3
# 2009

संस्कृतम् {सम्प्रेषणाधारितम्}

**COMMUNICATIVE SANSKRIT**

अवधिः : होरात्रयम् | CLASS- X | पूर्णाङ्कः : 100

Time allowed: 3 hours | | Maximum Marks: 100

खण्डः क : अपठितांश-अवबोधनम् — 15 Marks
Section A: Unseen Reading Comprehension

खण्डः ख : रचनात्मक-कार्यम् — 20 Marks
Section B: Writing Skills

खण्डः ग : अनुप्रयुक्त-व्याकरणम् — 30 Marks
Section C: Applied Grammar

खण्डः घ : पठित-अवबोधनम् — 35 Marks
Section D: Reading Comprehension

**Instructions:**
**निर्देशाः-**

i. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
The question paper has four sections.

ii. प्रतिखण्डम् उत्तराणि प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।
The answers have to be written in a separate answer-sheet.

iii. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
The answers to each section must be written at one place.

iv. प्रश्नपत्रे उत्तराणि न लेखनीयानि ।
Don't answer in the question paper.

v. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया ।
Write the question number according to the question paper.

vi. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
Answer all the questions in "SANSKRIT".

---

## खण्डः क (Section A)
## अपठितांश–अवबोधनम्

**Unseen Reading Comprehension** — **15 Marks**

**1. अधोलिखित–अनुच्छेदद्वयं पठित्वा प्रदत्तप्रश्नान् पृथक् प्रदत्तायाम् उत्तरपुस्तिकायाम् उत्तरत :**
**Read the following two passages and answer the questions in the given answer-sheet:**

(क) <u>प्रथमः अनुच्छेदः</u>

कश्चित् पुरुषः बहुकालात् सुवर्णपूरितं घटमेकं स्वसमीपे परिरक्षन् आसीत् । सर्वदा सः तं घटं समीपे एव स्थापयति स्म । कदाचित् सः स्नानार्थं नदीम् अगच्छत् । स्नानावसरे घटं समीपे स्थापयितुम् असमर्थः सः कोऽपि तम् आहरेत् इति भयेन तीरे एकं गर्तं प्रकल्प्य तस्यान्तः घटं निक्षिप्य तदुपरि वालुकाभिः लिङ्गमेकं निर्मितवान् । तथाकृत्वा यदा सः नदीम् अवातरत् तदा तत्र स्नानार्थम्

आगताः अन्येऽपि जनाः लिङ्गनिर्माणं तत्रत्यां पद्धतिं मत्वा एकैकं लिङ्गं निर्माय नदीम् अवातरन् । स्नानं समाप्य आगतः सः पुरुषः अनेकेषु लिङ्गेषु स्वनिर्मितं लिङ्गम् अभिज्ञातुमसमर्थः भूत्वा अधिकं व्यलपत् ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 2 = 2**

*i.* पुरुषः किंपूरितं घटं परिरक्षति ?

*ii.* जनाः कां तत्रत्यां पद्धतिम् अमन्यन्त?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 1 = 2**

*i.* स्नानार्थं आगताः अन्ये जनाः किम् अकुर्वन् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 2 = 1**

*i.* अनुच्छेदात् शत्रन्तं पदमेकं चित्वा लिखत ।

*ii.* 'सिकताभिः' इत्यर्थे किं पदं प्रयुक्तम् ?

**(ख) <u>द्वितीयः अनुच्छेदः</u>**

यदा मानवेन 'समाजः' इति काचित् परिकल्पना कृता अथवा काचित् व्यवस्था आरब्धा ततः सः मूलभूतज्ञानाद् अधिकं विशिष्टं किमपि अध्येतुम् आरभत । तस्य अध्ययनम् अनुभविनां मार्गदर्शनेन सुसाध्यं सञ्जातम् । एवं गुरु–शिष्य–परिकल्पना आरब्धा स्यात् । परम् अनन्तरकाले एषः केवलम् अध्यापयिता–अध्येता–सम्बन्धः न भूत्वा आदर–वात्सल्य–प्रेमादिभावयुक्तः कश्चन विशिष्टः एव सञ्जातः । गुरुः शिष्यं पुत्र इव भावयति स्म, शिष्यश्च गुरुं पितृसमानं मत्वा आदरं करोति स्म । किन्तु परिवर्तनशीलेऽस्मिन् जगति एषः गुरुशिष्यसम्बन्धोऽपि अधुना पूर्वस्मात् विभिन्नरूपे दृश्यते । अद्य गुरुः केवलम् अध्यापने स्वदायित्वं स्थापयन्, कदाचित् मित्रमिवापि व्यवहरति । शिष्यस्यापि आज्ञाकारित्वम् अनुशासितत्वम् इत्यादयः गुणाः न दृश्यन्ते । अधुना गुरुशिष्ययोस्सम्बन्धः तत्वनिष्ठः, कृतज्ञताहीनः भावशून्यः च वर्तते । अतः इदानीन्तनकाले प्राचीनकाले इव अध्ययनाध्यापनयोः उत्तमा प्रगतिः न दृश्यते ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 4 = 2**

*i.* मानवेन कृता परिकल्पना का ?

*ii.* इदानीन्तनकाले कुत्र उत्तमा प्रगतिः न दृश्यते?

*iii.* शिष्यः गुरुं कं मत्वा आदरं करोति स्म ?

*iv.* इदं जगत् कीदृशम् अस्ति?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **2 x 2 = 4**

*i.* अनन्तरकाले गुरुशिष्यसम्बन्धः कथं विशिष्टः सञ्जातः?

*ii.* अद्य शिष्यस्य के गुणाः न दृश्यन्ते?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 4 = 2**

*i.* 'दुःसाध्यम्' इति पदस्य विलोमपदं लिखत ?

*ii.* 'प्रगतिः' इति पदस्य विशेषणं किम्?

*iii.* 'भावयति' इति क्रियापदस्य कर्तृपदं किम्?

*iv.* 'सः मूलभूतज्ञानात्.............' इत्यादिवाक्ये 'सः' इति पदं कस्मै प्रयुक्तम्?

**IV. अस्य अनुच्छेदस्य समुचितं शिर्षकं लिखत ।**

**Write a suitable title for the above paragraph.** **1 x 2 = 2**

## खण्डः – ख

## (रचनात्मकलेखनम् )

**Section B: Writing Skills**

**2. रावणेन स्वमित्रं रामं प्रति लिखितम् अधः दत्तं पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत ।**

**Complete and rewrite the letter with the help of the words given in the box.** **½ x 10 = 5**

अशोकवनम्
स्वर्णलङ्का
दिनाङ्कः– 11–09–2008

प्रियमित्र! राम!

1.____________,

मद्गतं सर्वं कुशलम् अस्ति । भावयामि त्वमपि 2. ________ ।

गतसप्ताहे अहं नगरे एकं 3. __________ अगच्छम् । तत्र अहम् एकं विशिष्टं पुस्तकम् 4.________। तस्य शीर्षिकया एव अहम् आकर्षितः भूत्वा तत् 5. _____________ । आङ्ग्लभाषायाः तस्य नाम 'पाणिनितः पतञ्जलिपर्यन्तम्' ( Panini To Patanjali )। तस्मिन् 6.___________ सम्बद्धाः अनेके विषयाः 7. __________ सन्ति । अहं पठित्वा तुभ्यं दास्यामि, त्वमपि तद् 8. _____________ इति मन्ये ।

पुनर्मिलावः 9. _______ ।

| |
|---|
| संस्कृतभाषायाः, शुभमस्तु, सस्नेहं नमः, पुस्तकालयम्, क्रीतवान्, निरूपिताः, कुशलीति, इच्छसि, अपश्यम, रावणः, |

तव मित्रम्

10. _______________

**3. द्वयोः महिलयोः सम्भाषणम् उचितपदैः पूरयित्वा लिखत ।**

**Complete the following dialogue with the help of the statements given in the box and rewrite in your answer-sheet:** **1 x 5 = 5**

[ विपणौ द्वयोः महिलयोः वार्तालापः]

प्रथमा – सखि! कथमसि? 1. ________________________________________ ।

द्वितीया – सम्यगस्मि । तव जीवनं कथमस्ति ? 2. __________________________ ।

प्रथमा – आम् । नूतना एव । ह्यः क्रीता मया, कथमस्ति ?

द्वितीया – 3. ______________________________ ।

प्रथमा – पञ्चसहस्ररूप्यकाणि ।

द्वितीया– तावन्त्येव ? मया अपि क्रेतव्या । 4. ____________________________ ।

प्रथमा – आपणम् अत्र समीपे एव विद्यते । 5. ______________________________ ।

[ इति उभे विपणौ क्रयणं विसृज्य शाटिकापणं प्रति गच्छतः ]

| |
|---|
| उत्तमा दृश्यते, कति रूप्यकाणि ? |
| अधुनैव गच्छावः । |
| बहुदिनानि व्यतीतानि त्वां दृष्ट्वा । |
| किम् एषा नूतना शाटिका वा ? |
| अद्य एव मामपि नय तम् आपणं प्रति । |

**4. पञ्चसु संस्कृतवाक्येषु मञ्जूषा–पद–सहायतया अधोलिखितं चित्रं वर्णयत ।**

**Describe the following picture in five Sanskrit sentences with the help of words given in the box:** **2x 5 =10**



| |
|---|
| कृषकाः, तृणानि, निरताः, आकाशः, शाखा, कृषिकर्म, धान्यादीनि, मेघालापः |

## खण्डः ग (Section C)
## अनुप्रयुक्तव्याकरणम्
**Applied Grammar**

**5. अधोलिखित–वाक्येषु रेखाङ्कित–पदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायां लिखत ।**
**Rewrite the underlined words of the following sentences in your answer-sheet after joining or disjoining *Sandhis:*** **1 x 3 = 3**

1. **मृत्योर्मा** अमृतङ्गमय ।
2. विवेकानन्दस्य **वाक् + झरिः** इव प्रवहति स्म ।
3. **द्वाविमौ** प्रसिद्धौ इह ।

**6. अधोलिखित–अनुच्छेदे रेखाङ्कित–पदेषु समासविग्रहं कृत्वा पुनः उत्तरपुस्तिकायां लिखत ।**
**Disjoin the compounds in the underlined words and rewrite the paragraph in the answer-sheet:** **1 x 4 = 4**

1. **अयथाकालं** समागतोऽसि । सम्प्रति 2. **धर्ममतिः** सः पश्चात्तापेन 3. **दग्धमानसः** सर्वं वृत्तान्तं निवेद्य 4. **सकरुणम्** उच्चैः अक्रन्दत् ।

**7. रेखाङ्कितपदानां प्रकृति–प्रत्ययान् विभज्य अनुच्छेदं पुनः लिखत ।**
**Rewrite the passage after disjoining suffixes of underlined words :** **1 x 5 = 5**

कदाचित् 1. **विज्ञानी** तत्वज्ञम् अपृच्छत् – 'किं रहस्यं विश्वस्य ?' इति । 2. **बुद्धिमान्** सः अवदत्– 3. **अनन्तता** एव अस्य रहस्यम्' इति । परम् एतत् परीक्षितुम् 4. **इच्छन्** सः प्रयोगान् कृत्वा 5. **सामाजिकं** स्वास्थ्यम् अनाशयत् ।

**8. अधोलिखितां तालिकाम् उपयुज्य संस्कृते पञ्चवाक्यानि रचयत ।**
**Frame five sentences using the words in following table:** **1 x 5 =5**

| | | | |
|---|---|---|---|
| भारतीयाः | मिथः | अहितं | इच्छन्ति |
| | सदा | सर्वे | प्रणेतारः |
| | कदापि | सौहार्देन | न कुर्वन्ति |
| | एव | धर्मस्य | भवेयुः |
| | इव | शान्तिम् | जीवन्ति |

**9. अधोलिखित–वार्तालापे रिक्तस्थानानि पूरयित्वा उत्तराणि एव उत्तरपुस्तिकायां लिखत ।**
**Fill in the blanks in the following dialogue and write the answers in the answer-sheet:** **1 x 3 =3**

अर्जुनः – कृष्ण ! केन प्रयुक्तः नरः पापं 1. ____________ ।
कृष्णः – कामेन प्रयुक्तेन 2. ___________ पापं चर्यते । अतः मनः वशीकृत्य कामं क्रोधं च जहि ।
अर्जुनः– परं जनैः 3. ________ कथं गृह्यते?
कृष्णः – अभ्यासेन वैराग्येण च गृह्यते ।

10.**अधोलिखित–ग्रमीणानां दिनचर्यायाम् अङ्कानां स्थाने संस्कृतपदेषु समयम् उत्तरपुस्तिकायां लिखत ।**

**Here is the daily routine of villagers. Indicate the time in Sanskrit in the answer-sheet in place of figures.** **1 x 4 = 4**

ग्रामेषु जनाः प्रातः 4:00 ______ वादने एव उत्तिष्ठन्ति । प्रातःकर्म समाप्य 5:30__________ वादनसमये क्षेत्रं प्रति गच्छन्ति । तत्र 8:45_______ वादने प्रातराशं स्वीकृत्य पुनः कार्यरताः भवन्ति । सायं 6:15___________ वादनं यावत् कार्यं कृत्वा गृहं प्रतिनिवर्तन्ते ।

11.**अङ्कानां स्थाने संस्कृत–सङ्ख्यावाचक–विशेषण–पदानि प्रयुज्य उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Replacing numerals with Sanskrit adjectives in the following sentences, write your answers in the answer-sheet:** **½ x 4 = 2**

____________ [1] गौः अनेकान् जनान् उपकरोति । तस्याः __________ [4] पादाः भवन्ति । एकं पुच्छं __________ [2] शृङ्गे च भवतः । मासस्य ________ [30] दिनेषु अपि सा क्षीरं ददाति ।

12.**अधोलिखितवाक्यानां संशोधनं कृत्वा वाक्यानि पुनः उत्तरपुस्तिकायां लिखत ।**

**Correct and rewrite the following sentences in the answer-sheet:** **1 x 4 = 4**

कुत्रास्ति 1. **देवाः** इति हिरण्यकशिपुः स्वपुत्रम् अपृच्छत् । सः पुत्रः निर्भयः भूत्वा 2. **अवदम्** – भगवान् सर्वत्रास्ति इति । तदा 3. **एकैकां** स्तम्भं प्रदर्शयित्वा अपृच्छत् पूर्वपृष्टं प्रश्नम् । अन्ते एकस्मात् 4. **स्तम्भस्य** हरिः नरसिंहरूपेण आविर्बभूव ।

## खण्डः घ (Section D)

## पठित–अवबोधनम्

## Reading Comprehension

13.**अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्त–प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत ।**

**Read the following prose, poetry and drama passages and answer the given questions in the answer-sheet:**

**गद्यांशः–**

'नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्तानां परित्राणाय एव मे निश्चयः । अस्य याच्ञा वृथा मा अस्तु' । इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान् । सः अपि तत् नेत्रं यथास्थानम् अस्थापयत् । ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै ददौ । अथ विस्मितः शक्रः अचिन्तयत्– "अहो धृतिः! अहो सत्वम्! अहो सत्वहितैषिता ! नायं चिरं परिक्लेशम् अनुभवितुम् अर्हति । अतः प्रयतिष्ये चक्षुषोऽस्य प्रत्यारोपणाय इति ।

**प्रश्नाः–**

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x3=1 ½**

*i.* राज्ञः केषां परित्राणाय निश्चयः आसीत्?

*ii.* राजा कीदृशं चक्षुः उत्पाट्य शक्राय ददौ?

*iii.* शक्रस्य का वृथा मा अस्तु इति राजा चिन्तयति ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 2 = 2**

*i.*विस्मितः शक्रः कथम् उद्गारम् अकरोत् ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 3 = 1 ½**

*i.* 'अस्थापयत्' इति क्रियापदस्य कर्तृपदं किम् ?

*ii.* गद्यांशात् तल्–प्रत्ययान्तं पदमेकं चित्वा लिखत?

*iii.* 'अक्षतम्' इति पदं कस्य विशेषणम्?

**<u>पद्यांशः</u>–**

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥

**I. एकपदेन उत्तरत :**

**Answer in one word:** **1 x 2 = 2**

*i.* काभ्याम् उद्भवः वेगः सहनीयः ?

*ii.* कस्मात् प्राक् वेगः सहनीयः ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 1 = 1**

*i.* कः नरः सुखी युक्तः च ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **1 x 2 = 2**

*i.* 'शक्नोति' इति क्रियापदस्य कर्तृपदं किम् ?

*ii.* 'सुखी' अस्य प्रकृति–प्रत्ययौ विभज्य लिखत?

**नाट्यांशः–**

भीमः– (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान् ।

युधिष्ठिरः– गच्छ वत्स! विजयी भव । नकुलः तव सारथिः भवतु । (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)

श्रीकृष्णः – भो धर्मराज! समीचीनं न कृतं भवता । पुत्रशोक–विह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति ।

युधिष्ठिरः– भगवन्! स एकाकी एव द्रोणपुत्राय अलम् ।

श्रीकृष्णः– वत्स! न जानाति भवान् द्रोणपुत्रस्य चपलां प्रकृतिम् । पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे । यदि तत् प्रयुज्यते, सर्वा पृथिवी दग्धा स्यात् ।

**I. एकपदेन उत्तरत :**

**Answer in one word:** **½ x 3 = 1 ½**

*i.* भीमस्य सारथिः कः भवति ?

*ii.* ब्रह्मास्त्रप्रयोगेण का दग्धा स्यात् ?

*iii.* कीदृशः भीमसेनः द्रौणिं हन्तुम् अभिधावति ?

**II. पूर्णवाक्येन उत्तरत :**

**Answer in complete sentence:** **1 x 1 = 1**

*i.*भीमः युधिष्ठिरं किम् पृच्छति ?

**III. यथानिर्देशम् उत्तरत :**

**Do as directed:** **½ x 3 = 1 ½**

*i.* 'भ्रातः' इति कस्य सम्बोधनम् ?

*ii.* 'चपलां प्रकृतिम्' इत्यनयोः किं विशेषणपदम् ?

*iii.* 'समीपे' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

**14. अधोलिखित–पद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखत ।**

**Rewrite the following explanations of the stanzas after completing them with appropriate words:**

**1 x 6 = 6**

**<u>अ.</u>** किं जीवितम् ? अनवद्यम्, किं जाड्यम्? पाठतोऽप्यनभयासः ।
को जागर्ति ? विवेकी, का निद्रा मूढता जन्तोः ॥

**<u>भावार्थः</u> –** सज्जनैः 1.________ एव श्रेष्ठं जीवनं मन्यते । 2. __________ अपि अभ्यासः न क्रियते चेत् सा जडता इति उच्यते । यस्य विवेकः भवति स एव जागृतः भवति । नरस्य मूर्खता 3. _______ इति कथ्यते ।

**आ.** त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥

**भावार्थः** – 1.________ नरः धर्मयुक्तं वचनं विहाय 2. _________ वाणीं भाषते सा पक्वं 3. ______ त्यक्त्वा अपक्व–फल–खादनसमाना मूर्खता भवति ।

**15.अधोलिखितपद्यद्वयस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत ।**

**Complete and rewrite the prose-order-renderings of the following two verses:** **½ x 6 = 3**

**अ.** अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति ॥

**अन्वयः** – यत्र ब्रह्मशिरः 1.___________ परमास्त्रेण वध्यते 2.__________ द्वादश मासाः तद् राष्ट्रं न 3. _________ ।

**आ.** व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ।
क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ॥

**अन्वयः** – यः व्यसनं 1._______ मोहात् केवलं 2. ________ तस्य क्रन्दनं वर्धते 3. ____________ न समधिगच्छति ।

**16. रेखाङ्कित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

**Frame questions on the basis of the underlined words:** **1 x4 = 4**

1. **<u>मनसः</u>** निग्रहः वायोः इव दुष्करः ।
2. कामस्य नाशाय **<u>इन्द्रियाणि</u>** वशे कर्तव्यानि ।
3. राज्ञः नेत्रदाननिश्चयं ज्ञात्वा **<u>अमात्याः</u>** विषण्णाः जाताः ।
4. यद् अवसरे दत्तं तद् **<u>अनर्घम्</u>** ।

**17. घटनाक्रमानुसारम् अधोलिखित–वाक्यानि पुनः लिखत ।**

**Rewrite the following sentences in the sequential order:** **½ x 8 = 4**

1. मार्गे उद्दण्डबालकस्य वचांसि श्रुत्वा प्रच्छन्नभाग्यः चौरकर्म त्यक्तवान् ।
2. प्रच्छन्नभाग्यः दुष्टबुद्धिः च द्वे मित्रे आस्ताम् ।
3. दुष्टबुद्धिः तस्य गेहे चौरकर्म कर्तुम् आगच्छत् ।
4. तौ धनहरणार्थं ग्रामान्तरं गतौ ।
5. सः कृषकस्य क्षेत्रे हलकार्यं कर्तुम् आरभत ।

6. सर्पः बहिः निर्गत्य दुष्टबुद्धिमेव दष्टवान् ।
7. स्वप्नस्य वार्तां श्रूत्वा सः क्षेत्रात् विषधरयुक्तं कलशं प्राप्तवान् ।
8. मित्रं मारयितुं तत् कलशं सः मित्रस्य गृहे अक्षिपत् ।

**18. अधिलिखित–वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत ।**

**Write the appropriate meanings for the underlined words:** **1x 3 = 3**

1. क्रोधात् भवति **सम्मोहः** ।
   - अ. मूर्छा
   - आ. किङ्कर्तव्यविमूढता
   - इ. मोहः

2. **हेयम्** अपि च किम् ?
   - अ. ग्रहणयोग्यम्
   - आ. त्याज्यम्
   - इ. कल्याणमयम्

3. आपदां **तरणिः** धैर्यम् ।
   - अ. नौका
   - आ. तरणतडागः
   - इ. सूर्यः